|| નારાયણવર્મ ||

રાજોવાચ

યયા ગુપ્તઃ સહસ્રાક્ષઃ સવાહાન રિપુસૈનિકાન |
ક્રીડન્નિવ વિનિર્જિત્ય ત્રિલોક્યા બુભુજે શ્રિયમ || ૧ ||

ભગવંસ્તન્મમાખ્યાહિ વર્મ નારાયણાત્મકમ |
યથાઽતતાયિનઃ શત્રૂન યેન ગુપ્તોઽજયન્મૃધે || ૨ ||

શ્રીશુક ઉવાચ

વૃતઃ પુરોહિતસ્ત્વાષ્ટ્રો મહેંદ્રાયાનુપૃચ્છતે |
નારાયણાખ્યં વર્માહ તદિહૈકમનાઃ શૃણુ || ૩ ||

વિશ્વરૂપ ઉવાચ

ધૌતાંઘ્રિપાણિરાચમ્ય સપવિત્ર ઉદઙ્મુખઃ |
કૃતસ્વાંગકરન્યાસો મંત્રાભ્યાં વાગ્યતઃ શુચિઃ || ૪ ||

www.yousigma.com

નારાયણમયં વર્મ સન્નહ્યેદ્ભય આગતે |
દૈવભૂતાત્મકર્મભ્યો નારાયણમયઃ પુમાન || ૫ ||

પાદયોર્જાનુનોરૂર્વોરુદરે હૃદ્યથોરસિ |
મુખે શિરસ્યાનુપૂર્વ્યાદોંકારાદીનિ વિન્યસેત || ૬ ||

નમો નારાયણાયેતિ વિપર્યયમથાપિ વા |
કરન્યાસં તતઃ કુર્યાદ્દ્વાદશાક્ષરવિદ્યયા || ૭ ||

પ્રણવાદિયકારાંતમંગુલ્યંગુષ્ઠપર્વસુ |
ન્યસેદ્ધૃદય ઓંકારં વિકારમનુ મૂર્ધનિ || ૮ ||

ષકારં તુ ભ્રુવોર્મધ્યે ણકારં શિખયા દિશેત |
વેકારં નેત્રયોર્યુંજ્યાન્નકારં સર્વસંધિષુ || ૯ ||

મકારમસ્ત્રમુદ્દિશ્ય મંત્રમૂર્તિર્ભવેદ્બુધઃ |
સવિસર્ગં ફડંતં તુ સર્વદિક્ષુ વિનિર્દિશેત || ૧૦ ||

www.yousigma.com

"ઓં વિષ્ણવે નમઃ"

ઇત્યાત્માનં પરં ધ્યાયેદ્ધ્યેયં ષટ્શક્તિભિર્યુતમ |
વિદ્યાતેજસ્તપોમૂર્તિરિમં મંત્રમુદાહરેત || ૧૧ ||

હરિર્વિદધ્યાન્મમ સર્વરક્ષાં ન્યસ્તાંઘ્રિપદ્મઃ પતગેંદ્રપૃષ્ઠે |
દરારિચર્માસિગદેષુચાપપાશાન દધાનોઽષ્ટગુણોઽષ્ટબાહુઃ || ૧૨ ||

જલેષુ માં રક્ષતુ મત્સ્યમૂર્તિર્યાદોગણેભ્યો વરુણસ્ય પાશાત |
સ્થલે ચ માયાવટુવામનોઽવ્યાત ત્રિવિક્રમઃ ખેઽવતુ વિશ્વરૂપઃ || ૧૩ ||

દુર્ગેષ્વટવ્યાજિમખાદિષુ પ્રભુઃ પાયાન્નૃસિંહોઽસુરયૂથપારિઃ |
વિમુંચતો યસ્ય મહાટ્ટહાસં દિશો વિનેદુર્ન્યપતંશ્ચ ગર્ભાઃ || ૧૪ ||

રક્ષત્વસૌ માઽધ્વનિ યજ~ઝકલ્પઃ સ્વદંષ્ટ્રયોન્નીતધરો વરાહઃ |
રામોઽદ્રિકૂટેષ્વથ વિપ્રવાસે સલક્ષ્મણોઽવ્યાદ્ભરતાગ્રજો મામ || ૧૫ ||

મામુગ્રધન્વા નિખિલપ્રમાદાન્નારાયણઃ પાતુ નરશ્ચ હાસાત |
દત્તસ્ત્વયોગાદથ યોગનાથઃ પાયાદ્ગુણેશઃ કપિલઃ કર્મબંધાત || ૧૬ ||

સનત્કુમારોઽવતુ કામદેવાદ્ધયશીર્ષો માં પથિ દેવહેલનાત |
દેવર્ષિવર્યઃ પુરુષાંતરાર્ચનાત કૂર્મો હરિર્માં નિરયાદશેષાત || ૧૭ ||

ધન્વંતરિર્ભગવાન પાત્વપથ્યાદ્દ્વંદ્વાદ્ભયાદૃષભો નિર્જિતાત્મા |
યજ્ઞશ્ચ લોકાદુત તત્કૃતાન્નો બલો ગણાત ક્રોધવશાદહીંદ્રઃ || ૧૮ ||

દ્વૈપાયનો ભગવાનપ્રબોધાદ્બુદ્ધસ્તુ પાખંડગણાત પ્રમાદાત |
કલ્કી કલેઃ કાલમલાત પ્રપાતુ ધર્માવનાયોરુકૃતાવતારઃ || ૧૯ ||

માં કેશવો ગદયા પ્રાતરવ્યાદ્ગોવિંદ આસંગવ આત્તવેણુઃ |
નારાયણઃ પાતુ સદાઽઽત્તશક્તિર્મધ્યંદિને વિષ્ણુરરીંદ્રપાણિઃ || ૨૦ ||

દેવોઽપરાહ્ણે મધુહોગ્રધન્વા સાયં ત્રિધામાઽવતુ માધવો મામ |
દોષે હૃષીકેશ ઉતાર્ધરાત્રે નિશીથ એકોઽવતુ પદ્મનાભઃ || ૨૧ ||

શ્રીવત્સલક્ષ્માઽપરરાત્ર ઈશઃ પ્રત્યૂષ ઈશોઽસિધરો જનાર્દનઃ |
દામોદરોઽવ્યાદનુસંધ્યં પ્રભાતે વિષ્ણુઃ શ્રીમાન ભગવાન કાલમૂર્તિઃ ||
૨૨ ||

ચક્રં યુગાંતાનલતિગ્મનેમિ ભ્રમત્સમંતાદ્ભગવત્પ્રયુક્તમ |
દંદગ્ધિ દંદગ્ધ્યરિસૈન્યમાશુ કક્ષં યથા વાયુસખો હુતાશઃ || ૨૩ ||

ગદેડશનિસ્પર્શનવિસ્ફુલિંગે નિષ્પિંઢિ નિષ્પિંઢ્યજિતપ્રિયાડસિ |
કૂષ્માંડવૈનાયકયક્ષરક્ષોભૂતગ્રહાંશ્ચૂર્ણય ચૂર્ણયારીન || ૨૪ ||

ત્વં યાતુધાનપ્રમથપ્રેતમાતૃપિશાચવિપ્રગ્રહઘોરદૃષ્ટીન |
દરેંદ્ર વિદ્રાવય કૃષ્ણપૂરિતો ભીમસ્વનોડરીન હૃદયાનિ કંપયન || ૨૫ ||

ત્વં તિગ્મધારાડસિ વરારિસૈન્યમીશપ્રયુક્તો મમ છિંદિ છિંદિ |
ચક્ષૂંષિ ચર્મન શતચંદ્ર છાદય દ્વિષામઘં નો હર પાપચક્ષુષામ || ૨૬ ||

યન્નો ભયં ગ્રહેભ્યોડભૂત કેતુભ્યો નૃભ્ય એવ ચ |
સરીસૃપેભ્યો દંષ્ટ્રિભ્યો ભૂતેભ્યોડઘેભ્ય એવ ચ || ૨૭ ||

સર્વાણ્યેતાનિ ભગવન્નામરૂપાસ્ત્રકીર્તનાત |

પ્રયાંતુ સંક્ષયં સદ્યો યેઽન્યે શ્રેયઃપ્રતીપકાઃ || ૨૮ ||

ગરુડો ભગવાન સ્તોત્રસ્તોમચ્છંદોમયઃ પ્રભુઃ |
રક્ષત્વશેષકૃચ્છ્રેભ્યો વિષ્વક્સેનઃ સ્વનામભિઃ || ૨૯ ||

સર્વાપદ્ભ્યો હરેર્નામરૂપયાનાયુધાનિ નઃ |
બુદ્ધીંદ્રિયમનઃપ્રાણાન પાંતુ પાર્ષદભૂષણાઃ || ૩૦ ||

યથા હિ ભગવાનેવ વસ્તુતઃ સદસચ્ચ યત |
સત્યેન તેન નઃ સર્વે યાંતુ નાશમુપદ્રવાઃ || ૩૧ ||

યથૈકાત્મ્યાનુભાવેન વિકલ્પરહિતઃ સ્વયમ |
ભૂષણાયુધલિંગાખ્યા ધત્તે શક્તીઃ સ્વમાયયા || ૩૨ ||

તેનૈવ સત્યમાનેન સર્વજ્ઞો ભગવાન હરિઃ |
પાતુ સર્વૈઃ સ્વરૂપૈર્નઃ સદા સર્વત્ર સર્વગઃ || ૩૩ ||

વિદિક્ષુ દિક્ષૂર્ધ્વમધઃ સમંતાદંતર્બહિર્ભગવાન નારસિંહઃ |
પ્રહાપયન લોકભયં સ્વનેન સ્વતેજસા ગ્રસ્તસમસ્તતેજાઃ || ૩૪ ||

મઘવન્નિદમાખ્યાતં વર્મ નારાયણાત્મકમ |
વિજેષ્યસ્યંજસા યેન દંશિતોઽસુરયૂથપાન || ૩૫ ||

એતદ્ધારયમાણસ્તુ યં યં પશ્યતિ ચક્ષુષા |
પદા વા સંસ્પૃશેત સદ્યઃ સાધ્વસાત સ વિમુચ્યતે || ૩૬ ||

ન કુતશ્ચિદ્ભયં તસ્ય વિદ્યાં ધારયતો ભવેત |
રાજદસ્યુગ્રહાદિભ્યો વ્યાધ્યાદિભ્યશ્ચ કર્હિચિત || ૩૭ ||

ઇમાં વિદ્યાં પુરા કશ્ચિત કૌશિકો ધારયન દ્વિજઃ |
યોગધારણયા સ્વાંગં જહૌ સ મરુધન્વનિ || ૩૮ ||

તસ્યોપરિ વિમાનેન ગંધર્વપતિરેકદા |
યયૌ ચિત્રરથઃ સ્ત્રીભિર્વૃતો યત્ર દ્વિજક્ષયઃ || ૩૯ ||

સાંગનો ન્યપતત સદ્યઃ સવિમાનો હ્યવાક્શિરાઃ |
વિદ્યામિમાં ધારયતો મૃતસ્યાસ્થિવિલંઘનાત || ૪૦ ||

સ વાલખિલ્યવચનાદસ્થીન્યાદાય વિસ્મિતઃ |
પ્રાસ્ય પ્રાચીસરસ્વત્યાં સ્નાત્વા ધામ સ્વમન્વગાત || ૪૧ ||

ય ઇદં શૃણુયાત કાલે યો ધારયતિ ચાદૃતઃ |
તં નમસ્યંતિ ભૂતાનિ મુચ્યતે સર્વતો ભયાત || ૪૨ ||

શ્રીશુક ઉવાચ

એતાં વિદ્યામધિગતો વિશ્વરૂપાચ્છતક્રતુઃ |
ત્રૈલોક્યલક્ષ્મીં બુભુજે વિનિર્જિત્ય મૃધેઽસુરાન || ૪૩ ||

|| ઇતિ શ્રીમદ્ભાગવતે ષષ્ઠસ્કંધે નારાયણવર્મોપદેશઃ ||

www.yousigma.com